# Sri SuryaShatakam

# શ્રીસૂર્યશતકમ્

## Document Information

```
Text title : sUryashatakam 2
File name : sUryashatakam2.itx
Category : shataka, navagraha, stotra
Location : doc_z_misc_navagraha
Proofread by : Musiri Janakiraman
Description-comments : From stotrArNavaH 06.42
Latest update : July 16, 2021
Send corrections to : sanskrit@cheerful.com
```

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 29, 2023

*sanskritdocuments.org*

# શ્રીસૂર્યશતકમ્

શ્રિયા સમેત શ્રિતપારિજાતં
    વિયત્પ્રદીપં વિતતપ્રતાપમ્ ।
નયપ્રચારં નગરાજધીરં
    દયાસમુદ્રં તપનં નમામિ ॥ ૧॥

તેજોમયે મણ્ડલમધ્યભાગે
    સિંહાસને રત્નમયેઽબ્જરૂપે ।
અસીનમુગ્રાયુધદીપ્તહસ્તં,
    છાયાપતિં ચણ્ડકરં નમામિ ॥ ૨॥

હિરણ્યગર્ભાપ્તવરાન્ બલાઢ્યાન્
    મન્દેહદૈત્યાનનલોગ્રબાણૈઃ ।
સર્વાસુ સન્ધ્યાસુ નિવારયન્તં
    સંજ્ઞાપતિં દેવમહં નમામિ ॥ ૩॥

હિરણ્યગર્ભાચ્યુતપાર્વતીશૈઃ
    સ્વપાર્શ્વસંસ્થૈઃ પરિગીયમાનમ્ ।
મુક્તિસ્થલીયાયિમુનીશ્વરાણાં
    ઘણ્ટાપથં ભાસ્કરમાશ્રયામિ ॥ ૪॥

કિરીટ-કાઞ્ચી-વલયાઙ્ગુલાદ્યૈ-
    ર્વિભૂષણૈર્ભૂષિતમગ્નિવર્ણમ્ ।
સૌવર્ણવસ્ત્રં શ્રિતવાલખિલ્યૈઃ
    સંસેવ્યમાનં હરિમાશ્રયેઽહમ્ ॥ ૫॥

અષ્ટાપદશ્મશ્રુકચૈશ્ચ સર્વૈ-
    ર્હિરણ્મયાઙ્ગૈર્યુતમપ્રતર્ક્યમ્ ।
દેદીપ્યમાનં કિરણૈઃ સહસ્રૈ-
    રમ્ભોજમિત્રં રવિમાશ્રયામિ ॥ ૬॥

અનૂરુવૈદગ્ધ્યનિજાધ્વધાવ-
    ત્સપ્તાશ્વયુક્તે ફણિપાશબદ્ધે ।
છન્દોમયે દિવ્યરથે સ્થિતં શ્રી-
    સરોજિનીનાથમહં નમામિ ॥ ૭॥

દિને દિને મેરુગિરેઃ સમન્તાત્
    પ્રદક્ષિણપ્રક્રમણં વહન્તમ્ ।
સુરાસુરૈર્વન્દિતપાદપદ્મં
    પ્રભાકરં ત્વાં શરણં પ્રપદ્યે ॥ ૮॥

મિત્રં પવિત્રં નલિનીકલત્રં
    હિરણ્યગાત્રં હિમવીતિહોત્રમ્ ।
તમોલતાદાત્રમમર્ત્યચૈત્રં
    વિશાલનેત્રં રવિમાશ્રયેઽહમ ॥ ૯॥

અજાણ્ડગેહાન્તરરત્નદીપં
    સન્ધ્યાસુ સન્ધ્યાસુ સમસ્તવિપ્રૈઃ ।
હોમાર્ચનધ્યાનતપોજપાદ્યૌ-
    રારાધ્યમાનં દિનનાથમીડે ॥ ૧૦॥

ચતુઃશતૈરંશુભિરમ્બુવૃષ્ટિં
    તાવન્મિ તૈરાતપમુગ્રરૂપમ્ ।
તદર્ધમાનૈઃ કિરણૈર્હિમાનીમ્ ।
    પ્રકાશયન્તં પ્રભુમાશ્રયામિ ॥ ૧૧॥

માસાષ્ટકં ભૂમિગતામ્બુ પીત્વા
    ક્ષિતૌ પુનર્માસચતુષ્ટયેન ।
વૃ ષ્ટ્યા તટાકાદિજલપ્રદેશાન્
    પ્રપૂરયન્તં પુરુષં ભજેઽહમ્ ॥ ૧૨॥

યન્મણ્ડલે વારિધરપ્રકોપાત્
    અદૃશ્યમાને દિવસો નરાણામ્ ।
સ્યાદ્દુર્દિનં તસ્ય દિવાકરસ્ય ।
    શ્રીપાદયુગ્મં શરણં ભજેઽહમ્ ॥ ૧૩॥

પ્રત્યક્ષદૈવં પરિપૂર્ણબિમ્બં

સમુજ્જ્વલં દીધિતિભિઃ સહસ્રૈઃ ।
નિશાતમશ્ચિત્તગતં તમશ્ચ
પ્રધ્વંસયન્તં પરમેશમીડે ॥ ૧૪॥

કલિઙ્ગદેશેષ્વભિમાનપૂર્ણં
પ્રાગાનનં સારસપીઠસંસ્થમ્ ।
પ્રવાલસઙ્કાશલસચ્છરીરં
પ્રભાકરં ત્વાં પ્રણમામિ ભક્ત્યા ॥ ૧૫॥

પ્રભાકરાય પ્રમદપ્રદાય
પ્રાચીનવાક્પ્રત્યયકારણાય ।
પ્રપઞ્ચકેષુ પ્રકટીકૃતાત્મ-
પ્રસિદ્ધયે ચાસ્તુ નમઃ પ્રભાતે ॥ ૧૬॥

ઋગ્વેદરૂપેણ ચ મણ્ડલેન
સામસ્વરૂપૈઃ કિરણૈઃ સહસ્રૈઃ ।
યજુર્મયાઞ્ચદ્વપુષા સમેતં
ત્રયીમયં સપ્તહયં નમામિ ॥ ૧૭॥

યો યાજ્ઞવલ્ક્યાખ્યમુનીશ્વરાય
સાઙ્ગં દદૌ શુક્લયજુર્વિશેષમ્ ।
સપ્તાષ્ટશાખાસહિતં પવિત્રં
તસ્મૈ નમો દેશિકદેશિકાય ॥ ૧૮॥

તપઃ પ્રપૂર્ણાય મયાસુરાય
ગ્રહાગમં યં પ્રદદૌ સમગ્રમ્ ।
વેદાઙ્ગભૂતં પરમં રહસ્યં
નમોઽસ્તુ તસ્મૈ નલિનીપ્રિયાય ॥ ૧૯॥

દિને દિને કોટિસુવર્ણનિષ્કા-
નુત્પાદયન્તં જગદેકપૂજ્યમ્ ।
દદૌ સ્યમન્તાખ્યમણીવરં યઃ
સત્રાજિતે તં સવિતારમીડે ॥ ૨૦॥

તમોઽભિભૂતં ભવતીતિ વિશ્વં
સઞ્ચિન્ત્ય સાયં સમયે કૃશાનૌ ।
નિધાય તેજોલવમાત્મનો યો

યયૌ તમીશં કરુણાર્દ્રમીડે ॥ ૨૧॥

યદ્રશ્મયો વારિધિગર્ભસંસ્થા
વાયુપ્રકોપેષુ તટિલ્લતાઃ સ્યુઃ ।
દૃશ્યાર્ધભાગે પ્રસૃતા હિમાંશુ-
કલાસ્તમીડેઽમિતકાન્તિપુઞ્જમ્ ॥ ૨૨॥

યસ્યામૃતાન્નૌ ભિષજૌ સુરાણાં
હવિર્ભુજૌ મર્દિતદૈત્યવર્યૌ ।
હયાધિરૂઢૌ તનયાવભૂતાં
દસ્રૌ તમર્કં શરણં બ્રજામિ ॥ ૨૩॥

યસ્યાત્મજો ધર્મભૃતાં વરિષ્ઠો
વર્ણાશ્રમાચારવિધાનકર્તા ।
નૃપાલવંશાદિમબીજભૂતો
મનુસ્તમ્ભોજહિતં નમામિ ॥ ૨૪॥

વિદ્યુન્મણીજાઠરબાડબાગ્નિ-
ગ્રહર્ક્ષજામ્બૂનદચન્દ્રકાન્તિઃ ।
યદંશલેશદ્યુતિસમ્ભવા તં
પ્રભામયં દેવમહં નમામિ ॥ ૨૫॥

યન્નન્દનઃ પ્રાણિકૃતાઘપુણ્ય-
ફલપ્રદો યામ્યદિશાધિનાથઃ ।
ધર્મિષ્ઠવર્યઃ સમવર્તનોઽભૂ-
ધમસ્તમમ્ભોજહિતં નમામિ ॥ ૨૬॥

માસર્તુવર્ષાદિવિભક્તકાલઃ
ખણ્ડાહ્વયો યેન સમુત્થિતોઽભૂત્ ।
તં વિશ્વસર્ગાવનનાશહેતું-
નમામ્યહં કાશ્યપગોત્રમીશમ્ ॥ ૨૭॥

વિયોગદુઃખાર્દિતચક્રવાક-
દ્વિજાનવશ્યાયનિપીડિતાઙ્ગાન્ ।
પદ્માંશ્ચ શીતાર્તિયુતાન્ દરિદ્રાન્
સન્તોષયન્તં સવિતારમીડે ॥ ૨૮॥

ઉદ્બોધકા યસ્ય મરીચયઃ સ્યુઃ
    વિશ્વસ્ય નિદ્રાભરવિસ્મૃતસ્ય ।
ચોરવ્રજસ્યાયસશૃઙ્ખલાઃ સ્યુઃ
    તસ્મૈ નમઃ સારસબાન્ધવાય ॥ ૨૯॥

સન્ધ્યાદ્વયે યસ્ય મરીચયઃ સ્યુઃ
    બન્ધૂકપુષ્પપ્રતિમાનવર્ણાઃ ।
મધ્યન્દિને વજ્રવિભોપમાનાઃ
    તસ્મૈ નમસ્તીવ્રકરાય તુભ્યમ્ ॥ ૩૦॥

ત્રિનાભિયુક્તામરરૂપકૈક-
    ચક્રેણ સંવિન્મયકૂબરેણ ।
સમન્વિતે દિવ્યરથે વસન્તં
    નિતાન્તકાન્તં ભગવન્તમીડે ॥ ૩૧॥

યઃ કશ્યપઃ સ્યાદિતિ ગર્ભગોલાત્
    જાતઃ સુરેન્દ્રાય જયં પ્રદાતુમ્ ।
દ્વિષટ્કરૂપૈરમિતપ્રભાઢ્યૈઃ
    તં હેમવર્ણં પુરુષં નમામિ ॥ ૩૨॥

નમઃ પ્રભાતે વિધિરૂપકાય
    મધ્યન્દિને માધવરૂપકાય ।
દિનાવસાને હરરૂપકાય
    નિશાસુ સર્વાસુ ચિદાત્મકાય ॥ ૩૩॥

પૂર્વાચલાગ્રેઽસ્તનગસ્ય શૃઙ્ગે
    સુરાધ્વમધ્યે વિચરન્તમહ્નિ ।
નિશાસુ પાતાલગતામ્બરે ચ
    પ્રભાકરં ત્વાં પ્રણમામિ ભક્ત્યા ॥ ૩૪॥

લોકસ્ય બન્ધું ગગનસ્ય રત્નં
    ચક્ષુષ્મતા નેત્રમજાણ્ડરૂપમ્ ।
વેદસ્ય મૂલં પતિમમ્બુજાનાં
    પ્રભાતતેજસ્કરમીશમીડે ॥ ૩૫॥

રક્તપ્રસૂનાક્ષતગન્ધપર્ણૈઃ
    યન્ત્રે ચ મૂર્તૌ મનુજોઽતિભક્ત્યા ।

યમર્ચયિત્વા લભતે સ્વકામાં-
    સ્તં વાસુદેવં હૃદિ ભાવયામિ ॥ ૩૬॥

શુદ્ધાશયાઙ્ગા મનુજાઃ પ્રભાતે
    સૌરારુણિભ્યાં વિધિવદ્ધમીશમ્ ।
સમ્પૂજ્ય કામાનપવર્ગસૌખ્ય-
    મવાપ્નુયુસ્તં પુરુષં ભજેઽહમ્ ॥ ૩૭॥

છાયાસ્તિ ભાતિ પ્રિયનામરૂપે-
    ષ્વન્ત્યા ચતુર્થી કથિતા ચ સંજ્ઞા ।
આદ્યત્રયં ત્વં પરમાત્મતત્ત્વં
    તતો રવે ત્વાં શરણં બ્રજામિ ॥ ૩૮॥

નમઃ પતઙ્ગાય સુરાર્ચિતાય
    નમસ્તમોઘ્નાય હિમાન્તકાય ।
નમઃ સવિત્રે જગદેકભર્ત્રે
    નમો ગ્રહેશાય નમોઽવ્યયાય ॥ ૩૯॥

યમન્તરાદિત્યસમગ્રવિદ્યા-
    હૃત્પદ્મકોશાન્તરરન્ધ્રસંસ્થમ્ ।
નીવારશૂકાદપિ સૂક્ષ્મમીશં
    પ્રોવાચ તં ચિન્મયમાશ્રયામિ ॥ ૪૦॥

યદ્રશ્મયઃ સ્યુઃ પરિવેષરૂપાઃ
    સિતાસિતાભોજ્જ્વલકેતવશ્ચ ।
ભીમાશનીપાતશતહ્રદાશ્ચ
    તસ્મૈ નમો દીધિતિમાલિને તે ॥ ૪૧॥

તુષારવૃષ્ટ્યાન્વિતપુષ્કરે ય-
    ન્મરીચયો રત્નચયાઞ્ચિતસ્ય ।
સુરેન્દ્રચાપસ્ય સમાનરૂપાઃ
    ભવન્તિ તં દ્વાદશરૂપમીડે ॥ ૪૨॥

મિત્રાણિ યસ્યેન્દુસુરેજ્યભૌમાઃ
    શત્રૂ સિતાર્કી શશિજસ્તટસ્થઃ ।
ત્રિષડ્દશા યેષુ ગતશ્ચ રાશેઃ
    શુભપ્રદસ્તં શ્રુતિબોધ્યમીડે ॥ ૪૩॥

પ્રભાતકાલેઽસ્તમયાખ્યકાલે
    યન્મણ્ડલં વ્યોમ્નિ વિતસ્તિમાનમ્ ।
અષ્ટાઙ્ગુલં સ્યાત્ કુતપે ચ દૃષ્ટં
    તસ્મૈ નમઃ શ્રીનલિનીપ્રિયાય ॥ ૪૪॥

તુલાદિષટ્-સઙ્ક્રમણેષુ યસ્ય
    બિમ્બં ભવેદ્દક્ષિણભાગસંસ્થમ્ ।
મેષાદિષટ્કે ચ નિરક્ષદેશાત્
    ઉદક્સ્થિતં તં પ્રણમામિ ભાનુમ્ ॥ ૪૫॥

અહઃક્ષયં કર્કટકાદિષટ્કે
    નિશાક્ષયં નક્રગૃહાદિષટ્કે ।
નિરક્ષદેશોત્તરસંસ્થિતાનાં
    કરોતિ યસ્તં દિનનાથમીડે ॥ ૪૬॥

યન્મણ્ડલે રાશિયુગે ચ સંસ્થે
    સઙ્ક્રાન્તિનામાધિકપુણ્યકાલઃ ।
ચન્દ્રાન્વિતે દર્શસમાહ્વયઃ સ્યાત્
    તસ્મૈ નમો દેવપિતૃસ્તુતાય ॥ ૪૭॥

અહર્નિશાહ્રાસવિવૃદ્ધિદાન-
    મનેકધા ભિન્નમહીગતાનામ્ ।
કુર્વન્તમર્કં ઘૃણિમણ્ડલસ્થ-
    મહોમયં વેદમયં નમામિ ॥ ૪૮॥

ધીરં મહોદારમમેયસારં
    સૂરં નુતારં ધૃતચારુહારમ્ ।
વીરાધિવીરં કૃતવારિપૂરં
    શુભપ્રચારં સુવિચારમીડે ॥ ૪૯॥

યસ્યાંશજઃ કીશગણાધિનાથો
    વિકર્ણનાસં યુધિ કુમ્ભકર્ણમ્ ।
પાદાહતં પઙ્ક્તિગલં ચ ચક્રે-
    રુમાપતિસ્તં શરણં બ્રજામિ ॥ ૫૦॥

યદ્વંશજાતો ભગવાન્ મુકુન્દો

વિશ્વસ્ય સર્વસ્ય ચ રક્ષણાય ।
ક્રૂરાસુરાણાં ચ વધાય રામઃ
પરાત્પરં તં દિવસેશમીડે ॥ ૫૧॥

ધ્યાનસ્ય કાલેઽખિલયોગિવર્યા
યદ્બિમ્બમાદૌ હૃદયે વિચિન્ત્ય ।
ધ્યાયન્તિ તન્મણ્ડલમધ્યદેશે
દેવં તમીશં તદભિન્નમીડે ॥ ૫૨॥

યસ્યાત્મજા રૂપવતી કલિન્દ-
કન્યા મુકુન્દસ્ય સતી બભૂવ ।
પ્રવાહરૂપેણ પયઃપયોધિં
ગતા તમર્કં મનસા સ્મરામિ ॥ ૫૩॥

ઘટીદ્વયધ્યાનતપોઽધિકાય
યુધિષ્ઠિરાયાધિકધાર્મિકાય ।
અક્ષય્યમન્નં પ્રદદૌ રસાઢ્યં
યઃ પુણ્યવાંસ્તં ગ્રહરાજમીડે ॥ ૫૪॥

સન્ધ્યાવિધૌ હોમવિધૌ દ્વિજેન્દ્રૈઃ
દિને દિને યઃ પરિપૂજ્યમાનઃ ।
યસ્યાર્ચનં વર્ગચતુષ્કદાન-
ક્ષમં તમીશં શરણં વ્રજામિ ॥ ૫૫॥

ઉદ્યન્તમર્કં ભજતે પુમાન્ યઃ
સ વૈ નરો બ્રાહ્મણશબ્દવાચ્યઃ ।
ઉપૈતિ ભદ્રં પરમાર્થરૂપ-
મિત્યાહ વેદઃ ખલુ વિશ્વનાથ ॥ ૫૬॥

બ્રહ્મેતિ નામ ત્વયિ યોગરૂઢિ-
પ્રાપ્તં શ્રુતિઃ પ્રાહ વિયુક્તબાધમ્ ।
સન્ધ્યાસુ સન્ધ્યાસુ ચ વિપ્રવર્યૈઃ
તદેવ સૂક્તં ખલુ પદ્મબન્ધો ॥ ૫૭॥

ચરાચરાણામિહ સૂર્ય આત્મે-
ત્યન્તસ્તમુક્ત્વા યમયન્તમીશમ્ ।
તેષાં ચ સંવિન્મયરૂપમર્કં

પુનઃ શ્રુતિઃ પ્રાહ દિનાધિપં ત્વામ્ ॥ ૫૮॥

જ્ઞાનસ્વરૂપસ્ય તવાજ્ઞતા ન
જ્ઞાનં ચ સત્ત્વપ્રકૃતેશ્ચ યોગાત્ ।
અનન્તકલ્યાણગુણાશ્ચ ભાન્તિ
મેઽધ્યાત્મકાલે જલજાતબન્ધો ॥ ૫૯॥

ત્વાં કર્મણાં સાક્ષિણમાગમાનાં
સ્વરૂપભૂતં જગતાં ચ બન્ધુમ્ ।
કાલસ્ય કર્તારમુશન્તિ વેદાઃ
પરાત્પરસ્ત્વામપહાય કોઽન્યઃ ॥ ૬૦॥

શ્રીશઙ્કરાચાર્યગુરુર્મહાત્મા
પઞ્ચામરાણાં પ્રથમં યમાહ ।
આલોક્ય સર્વોપનિષન્નિગૂઢ-
વાક્યાનિ વન્દે પુરુષં તમર્કમ્ ॥ ૬૧॥

પ્રાગ્ભૂમિભૃન્મૌલિધૃતં પ્રભાતે
માણિક્યકોટીરમિવ પ્રદીપ્તમ્ ।
સરોજિનીપુણ્યફલસ્વરૂપ-
મુદ્યન્તમર્કં પ્રણમામિ ભક્ત્યા ॥ ૬૨॥

પ્રાચીવધૂરમ્યમુખે હિમામ્બુ-
પ્રક્ષાલિતે કુઙ્કુમપઙ્કચિત્રમ્ ।
કાલ્યેન નિક્ષિપ્તમિવ પ્રદીપ્ત-
મુદ્યન્તમર્કં મૃદુરશ્મિમીડે ॥ ૬૩॥

સન્ધ્યાસ્ત્રિયા કાલકુમારકસ્ય
પ્રાક્શૈલમઞ્ચોર્ધ્વતલે નિબદ્ધમ્ ।
ગુઞ્જામયં ગુચ્છમિવ પ્રદીપ્તં
બાલં રવિં કોમલદેહમીડે ॥ ૬૪॥

કાલપ્રબોધાય સુરાધિપેન
પ્રાક્શૈલહર્મ્યોર્ધ્વતલે નિબદ્ધા ।
રત્નસ્રજસ્થાપિતઝલ્લરીવ
યઃ સંસ્થિતસ્તં પૃથુકાર્કમીડે ॥ ૬૫॥

પ્રભાતકાલાહ્વયકેશવસ્ય
    પ્રાચીદિશાખ્યેન્દિરયા યુતસ્ય ।
સમર્પિતં કૌસ્તુભનામરત્ન-
    મિવ જ્વલન્તં પૃથુકાર્કમીડે ॥ ૬૬॥

સુરેન્દ્રદિક્પર્વતવેદિકાયાં
    કાલાખ્યયજ્વપ્રવરેણ દીપ્તમ્ ।
અઙ્ગારસઙ્ઘાતમિવ જ્વલન્તં
    બાલં રવિં શોણતનું નમામિ ॥ ૬૭॥

નિશાખ્યગૌરીકૃતપૂજનેન
    ગાઢાન્ધકારાઙ્ગજતાડિતેન ।
ઉન્મીલિતં પ્રાગ્ગિરિશઙ્કરેણ
    જાલામયાક્ષીવ લસન્તમીડે ॥ ૬૮॥

પૂર્વાદ્રિશ‍ૃઙ્ગસ્થિતકિઙ્કિરાત-
    દ્રુમે પ્રભાતાખ્યવસન્તકાલે ।
જાતં મહાગુચ્છમિવારુણાંશું
    નમામ્યહં કશ્યપમૌનિપુત્રમ્ ॥ ૬૯॥

દૃષ્ટ્વા શચીસંયુતમાત્મનાથં
    પ્રાગઙ્ગનાયાઃ પતિકોપવત્યાઃ ।
રક્તાંશુયુક્તાસ્યમિવ સ્ફુરન્તં
    નમામિ બાલં નલિનીકલત્રમ્ ॥ ૭૦॥

કાલ્યપ્રભાશોણનદીપ્રવાહે
    મરીચિકિઞ્જલ્કવિરાજમાનમ્ ।
રક્તોત્પલં જાતમતીવ ભાન્તમ્
    ઉદ્યન્તમર્કં હરિદશ્વમીડે ॥ ૭૧॥

મન્દાકિનીકોકસુરાસુરૌઘૈઃ
    કાલ્યપ્રભામન્દરપર્વતેન ।
ચાન્દ્રીપયોબ્ધૌ ભથિતે પ્રભૂત-
    ચિન્તામણીવ સ્થિતમર્કમીડે ॥ ૭૨॥

પ્રભાતસૂનોરભિષેચનાય
    પ્રાચીરમણ્યાતપવારિદીપ્તમ્ ।

આનીતમષ્ટાપદરત્નકુમ્ભ-
    મિવ સ્થિતં પદ્મહિતં નમામિ ॥ ૭૩॥

પ્રભાતનારાયણહસ્તસંસ્થં
    ગાઢાન્ધકારાસુરરક્તસિક્તમ્ ।
મરીચિધારાપરિપૂર્ણચક્ર-
    મિવ સ્થિત બાલરવિં નમામિ ॥ ૧૪॥

પ્રાગબ્ધિવેલાવલયોદ્ભવાયા
    હિમામ્બુસદ્યોહદવર્ધિતાયાઃ ।
કાલ્યપ્રભાવિદ્રુમવલ્લિ કાયાઃ
    ફલેન તુલ્યં તરુણાર્કમીડે ॥ ૭૫॥

હિમોદકોદ્રેકમવેક્ષ્ય રાત્રૌ
    પાનાય તસ્યાબ્ધિજલં વિહાય ।
નભોગતૌર્વાગ્નિમિવ પ્રદીપ્તં
    શોણદ્યુતિં બાલરવિં નમામિ ॥ ૭૬॥

ચક્રદ્વિજાનામતનુક્રિયાણા-
    મુદ્બોધકં રાત્રિમુખેઽતિમોહાત્ ।
અમ્ભોજિનીકુડ્મલમધ્યગસ્ય
    ભૃઙ્ગસ્ય મોક્ષપ્રદમર્કમીડે ॥ ૭૭॥

ઇન્દીવરાણાં પલલાશનાનાં
    ઘૂકાદિકાનાં ચ વિભાવરીણામ્ ।
જારસ્ય ચોરસ્ય ચ દુઃખહેતું
    સતાં ચ વૃદ્ધિપ્રદમર્કમીડે ॥ ૭૮॥

ભાસ્વાન્ રવિર્ભાનુરનન્તરત્નં
    દિવાકરશ્ચણ્ડગભસ્તિરર્કઃ ।
માર્તાણ્ડ આદિત્ય ઇનો વિવસ્વાન્
    મિત્રોઽર્યમા રક્ષતુ માં દયાબ્ધિઃ ॥ ૭૯॥

રક્તાતપત્રધ્વજચામરાઢ્યં
    રક્તામ્બરં રક્તમરીચિબિમ્બમ્ ।
રક્તૈર્વિભૂષાસુમગન્ધમાલા-
    બ્જૈર્યુતં પદ્મહિતં નમામિ ॥ ૮૦॥

આનન્દકન્દં હતશત્રુવૃન્દં
    દયાસમુદ્રં દમશાલિભદ્રમ્ ।
સંજ્ઞાસમેતં સવનપ્રપૂતં
    દીપ્તપ્રબોધં દિનનાથમીડે ॥ ૮૧॥

યસ્યોદયે દીધિતયઃ રબકીયા
    મન્દેહદેહક્ષતજોપમાનાઃ ।
પ્રાચીસતીભૂષણરત્નરોચિ-
    ર્નિભાસ્તમાદિત્યમહં નમામિ ॥ ૮૨॥

યન્મણ્ડલં પઞ્ચશતાધિકાઞ્ચ-
    ત્સહસ્રષટ્કોજ્જ્વલયોજનેન ।
વ્યાસેન યુક્તં ઘનગોલરૂપં
    તસ્મૈ નમઃ પઙ્કજબાન્ધવાય ॥ ૮૩॥

સવ્યં સુરાણામપસવ્યવૃત્ત્યા
    રક્ષોવરાણાં ગગને ચરન્તમ્ ।
તેષાં દિન માનવવત્સરેણ
    પ્રપૂરયન્તં રવિમાશ્રયામિ ॥ ૮૪॥

નમામિ દેવં મહિતપ્રભાવં
    વિપક્ષદાવં પરિશુદ્ધભાવમ્ ।
રણાઙ્ગગણપ્રોત્થિતશઙ્ખરાવં
    છાયાસતીકલ્પિતનૂત્નસેવમ્ ॥ ૮૫॥

સમઞ્ચિતાહ્લાદમુરુપ્રસાદં
    સરોજપાદં શ્રિતસર્વવેદમ્ ।
મૃગેન્દ્રનાથં કૃતદૈત્યખેદં
    સમગ્રવાદં સવિતારમીડે ॥ ૮૬॥

નમામિ સૂર્યં નગરાજધૈર્યં
    કૃપાર્દ્રચર્યં કૃતપુણ્યકાર્યમ્ ।
સુપર્વવર્યં સુગુણૌઘધુર્યં
    પઞ્ચાસ્યવીર્યં પરિપાલિતાર્યમ્ ॥ ૮૭॥

વન્દે દિનેશં વરહેમકેશં

સત્કીર્તિકાશં સતતપ્રકાશમ્ ।
શ્રીમત્પ્રદેશં શ્રિતપાપનાશં
પ્રભાવૃતાશં પ્રથિતપ્રજેશમ્ ॥ ૮૮॥

સત્યાય નિત્યાય ચિદાત્મકાય
ગૂઢાય રૂઢાય પરાત્પરાય ।
દિવ્યાય ભવ્યાય દિવાકરાય
માન્યાય ધન્યાય નમો નમસ્તે ॥ ૮૯॥

અચિન્ત્યમવ્યક્તમનાદિમધ્યં
ચિદ્રૂપમાનન્દઘનં પ્રશાન્તમ્ ।
જ્યોતિર્મયં યં પ્રવદન્તિ વેદાઃ
તસ્મૈ નમસ્તેઽસ્તુ વિકર્તનાય ॥ ૯૦॥

દુર્ગાગણાધીશ્વરશમ્ભુવિષ્ણુ-
સૂર્યાહ્વયૈઃ પઞ્ચવિધસ્વરૂપૈઃ ।
સમન્વિતં ભક્તજનાય કામાન્
દિશન્તમીશં પ્રણમામિ નિત્યમ્ ॥ ૯૧॥

ગ્રહર્ક્ષભૂગોલસહસ્રકોટિ-
પ્રસ્ફીતવેધોઽણ્ડશતાયુતસ્ય ।
અન્તર્બહિઃપૂર્ણમનન્તશક્તિ-
મહોમયં દેવમહં પ્રપદ્યે ॥ ૯૨॥

કલ્યાણરૂપં કવિરાજસેવ્યં
સમગ્રસત્ત્વં વિતતાત્મબિમ્બમ્ ।
કલ્યાણરૂપં કવિરાજસેવ્યં
સમગ્રસત્વં વિતતં નમામિ ॥ ૯૩॥

યં યોગિનઃ સાઙ્ખ્યવિદશ્ચ પાઞ્ચ-
રાત્રવ્રતાઃ પાશુપતાગમજ્ઞાઃ ।
વેદાન્તવિદ્યાનિરતા ભજન્તઃ
પ્રયાન્તિ મુક્તિં તમજં ભજેઽહમ્ ॥ ૯૪॥

સર્વેષુ કાલેષુ ચ બાલરૂપં
સર્વેષુ કાલેષુ ચ યૌવનસ્થમ્ ।
સર્વેષુ કાલેષુ ચ વૃદ્ધભાવં

વિકારશૂન્યં રવિમાશ્રયામિ ॥ ૯૫॥

નિરઞ્જનં નિર્ગુણમપ્રમેયં
કૂટસ્થમવ્યક્તમનન્તમાદ્યમ્ ।
નિર્દ્વન્દ્વમાનન્દમખણ્ડમેકં
ચૈતન્યરૂપં રવિમાશ્રયામિ ॥ ૯૬॥

કોદણ્ડરામાહ્વયવિપ્રવર્ય-
પ્રપૂજિતં શ્લોકશતાબ્જપુષ્પૈઃ ।
છાયાખ્યબિબ્બોકવતીસમેતં
સંજ્ઞાપતિં ત્વાં શરણં પ્રપદ્યે ॥ ૯૭॥

યોગીશ્વરો વેઙ્કટકૃષ્ણયજ્વા
તત્પુત્રકં કોટ્કેલપૂડિવંશ્યમ્ ।
કોદણ્ડરામાહ્વયવિપ્રવર્યં
માં પાહિ માં પાહિ સરોજબન્ધો ॥ ૯૮॥

હે સૂર્ય હે ભાસ્કર હે દિનેશ
હે દેવ હે કાશ્યપ તમોઘ્ન ।
પાપૈઃ સમેતં સમવર્તિભીતં
માં રક્ષ માં રક્ષ કૃપાર્દ્રદૃષ્ટે ॥ ૯૯॥

ભવ ત્કુમારં શમનં ગુણાઢ્યં
કેનાપ્યુપાયેન તુ શાન્તચિત્તમ્ ।
મદ્રક્ષણાયાશુ કુરુષ્વ નો ચેત્
સાયુજ્યમુક્તિં દિશ મે દિનેશ ॥ ૧૦૦॥

સંસારકૂપે પતિતં મહાઘૈઃ
જુષ્ટં યમાદ્ભીતમપુણ્યલેશમ્ ।
માં રક્ષિતું ત્વામપહાય કોઽન્યઃ
શક્તોઽસ્તિ ભાનો પરિપાલયાશુ ॥ ૧૦૧॥

પુણ્યાત્મનાં રક્ષણતો ન તે સ્યાત્
ધનત્વમબ્જપ્રિય માદૃશાનામ્ ।
પાપાત્મનાં રક્ષણતો યશસ્તે
ભવત્યપારં પરમેશ પાહિ ॥ ૧૦૨॥

શ્રુતિસ્મૃતિભ્યાં નિગમાન્તહોરા-
    ગમૈઃ પુરાણૈર્ભવદીયતત્ત્વમ્ ।
જાનામિ કિઞ્ચિદ્દિનનાથ તસ્મા-
    ત્સંરક્ષણીયોઽસ્મિ તવાહમદ્ય ॥ ૧૦૩॥

ત્યાગેન દોષો ભવતીશ્વરાણાં
    ભક્તસ્ય પુંસઃ શરણાગતસ્ય ।
અજ્ઞાતમર્થં તવ નાસ્તિ તસ્માત્
    રક્ષસ્વ ભાનો શરણાગતં મામ્ ॥ ૧૦૪॥

સંજ્ઞાન્વિતાય શ્રિતરક્ષકાય
    છાયાસમેતાય પરાત્પરાય ।
ચક્રસ્તુતાયામ્બુજિનીપ્રિયાય
    મહાત્મને મઙ્ગલમસ્તુ નિત્યમ્ ॥ ૧૦૫॥

ત્વત્સુન્દરીભ્યાં ભવદાત્મજેભ્યઃ
    ત્વત્પુત્રિકાભ્યસ્તવ સેવકેભ્યઃ ।
તુભ્યં હરે સૌમ્યમતે દયાલો
    જગદ્ધતે મઙ્ગલમસ્તુ નિત્યમ્ ॥ ૧૦૬॥

કોદણ્ડરામાર્યકૃતસ્તુતિં યે
    પઠન્તિ શૃણ્વન્તિ ચ ભક્તિયુક્તાઃ ।
તેષાં શ્રિયં પુત્રકલત્રસૌખ્યં
    સ્વર્ગં ચ મોક્ષં દિનનાથ દેહિ ॥ ૧૦૭॥

॥ ઇતિ શ્રીસૂર્યશતકં સમ્પૂર્ણમ્ ॥

Proofread by Musiri Janakiraman

Stotrarnava 06.42

*Sri SuryaShatakam*

pdf was typeset on June 29, 2023

Please send corrections to *sanskrit@cheerful.com*